International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(1): 105-107
© 2018 IJSR
www.anantaajournal.com
Received: 13-11-2017
Accepted: 16-12-2017

**डः सुवल चन्द्र साहु**
अध्यापक, व्याकरणविभाग,
सरकारी डिग्री संस्कृतमहाविद्यालय,
वारिपदा, भारत

**Correspondence**
**डः सुवल चन्द्र साहु**
अध्यापक, व्याकरणविभाग,
सरकारी डिग्री संस्कृतमहाविद्यालय,
वारिपदा, भारत

# असिद्धं वहिरङ्गमन्तरङ्गे-इति परिभाषायाः नागेशदिशा विवेचनम्

**डः सुवल चन्द्र साहु**

**उपक्रमः-**

पाणिनीयव्याकरणपरंपरायां वैयाकरणनागेशस्य गरिमा सवैरेव निर्दिष्टतया अंगीकृता। परिभाषा तावत् संकेतग्राहकेसंज्ञासूत्रेभ्यः भिन्नत्वात् सूत्रार्थबोधपरिपूर्णाय विनिर्दिष्टा। नागेशविरचितपरिभाषेन्दुशेखरे अष्टाध्यायीस्थपरिभाषासूत्राणां पुनरुक्तिभयात् नैव उपपादनं जातम् । अत्र तु महाभाष्यवर्णितानां ’व्याख्यानतो...“ कतिपयपरिभाषाणां तथा सिरदेवकृतपरिभाषावृत्तिग्रन्थोक्तपरिभाषाणां च संपादनं परिलक्ष्यते ।

नित्यादप्यन्तरङ्गवलीयः अन्तरङ्गे वहिरङ्गस्यासिद्धत्वात् । तदाह-

नित्यशास्रात् अन्तरङ्ग शास्त्रं वलीयम् । तन्निमितं परिभाषा वर्त्तते ’पूर्वपरनित्यान्तरङ्गापवादानोमुत्तरोत्तरं “ वलीयम् । यः विधिः कृतेऽपि प्राप्नोति । अकृतेऽपि प्राप्नोति सः विधिः नित्यः तर्हि उच्यते-’कृताकृतप्रसङ्गी नित्यम् “ । तद्विपरितमनित्यमिति । अर्थात् यदा वहिरङ्गस्यापि प्रवृत्तिः नित्यरूपेण भवति तदा अन्तरङ्गे वहिरङ्गस्य असिद्धत्वात् नित्यादपि अन्तरङ्गं वलीय इति उक्तेः सार्थकता दृश्यते । अर्थात् नित्यशास्त्रं यं अपरशास्त्रं प्रति वहिरङगरूपेण कार्यं करोति तत् अन्तरङ्गशास्त्रे प्रति वहिरङ्गशात्रस्य असिद्धता प्रवर्त्तते । तर्हि परिभाषा आबच्छति – ’असिद्धं वहिरङ्गमन्तरङ्गे“ इति । अर्थात् अन्तरङ्गे कार्ये कर्त्तव्ये वहिरङ्ग असिद्धम् ।

ततः किमेव अन्तरङ्गम् ? किमेव वहिरङ्गमिति? प्रश्ने कृते उत्तरं भवति –अन्तर्मध्ये वहिरङ्गशास्त्रीयनिमित्तसमुदायमध्ये अन्तर्भूतान्यङ्गानि निमित्तानि यस्य तद् अन्तरङ्गम्। अर्थात् अन्तर्+अङ्ग = अन्तरङ्ग भवति । अत्र अन्तर् शब्दस्यार्थः मध्ये । मध्ये इत्युक्ते प्रश्नः नागर्त्ति कस्य मध्ये ? उत्तरमायाति –वहिरङ्गशास्त्री निमित्तसमुदायमध्ये । सर्वोपरि अन्तर्मध्ये वहिरङ्ग शास्त्रीयनिमित्तसमुदायमध्ये वहिर्भूताङ्गकं वहिरङ्गम् इति । एतस्य ’स्वस्वसानयोः इति सूत्रे ’असिद्धवत् सूत्रे“ च भाष्य कैयटयोः स्पष्टम् ।

अत्राङ्गशब्देन शब्दरूपं स्थानिवतिसूत्रस्थभाष्यवार्त्तिकादि संग अर्थरूपनिमित्तः । अत्र अन्तरङ्गवहिरङ्गयोर्मध्ये अङ्गशब्देन शब्देन शब्दरूपनिमित्तमेव गृह्यते। शब्दशास्त्रे तस्य शब्दरूपनिमित्तस्य प्राधानं परिलक्ष्यते तर्हि अङ्ग नापि गृह्यते । अर्थरूपनिमित्तं न स्वीकरणीयम्, ततः अर्थनिमित्तकस्य न bवहिरङ्गत्वम् । अर्थनिमित्तकवहिरङ्गस्य ग्रहणं न भवतीति ’न तिसृचतसृ“ इति निषेधश्छ चरितार्थः दृश्यते ।

भाष्यकैयटयोः मतोपस्थापनम्।

संज्ञाकृतवहिरंगत्वस्य अनाश्रयणे भाष्यकैयटयोः जायमानवैमत्यमुपस्थाप्य नागेशः कथयति- येनविधिस्तदन्तस्य' सूत्रे भाष्ये एवं चर्चितं यत्- इकोयणचि' सूत्रे तदन्तविधिः भवितव्य इति। तत्र इक्, तथा यण् उभयत्र एव तदन्तविधिसहितं अचि इति सप्तम्यन्तपदे तदन्तविधेरपवादभूततदादिविधिं विधाय 'इकोयणचि' सुत्रार्थस्तु एवं कृतं यत्-इगन्तस्य स्थाने यणन्तस्य आदेशो भवतु अजादि शव्दे परे।

एतादृशभाष्यवचनोपरि कैयटः व्रवीति –सिव् धातोः वाहुलकात् औणादिक न प्रत्यये सिव-न स्थितौ गुणः, वलोपः तथा उठागमरुपं कार्यत्रयं प्राप्नोति।

अत्र उठ् अपवादत्वात् वलोपं वाधते, अन्तरंगत्वात् गुणं वाधते। अत्रकैयटवचनात् संज्ञाया अपेक्षात्वात् वहिरंगता सुस्पष्टा।

कैयटवचनं निराकृत्य नगेशः कथयति – संज्ञाकृतवहिरंगप्रतिपादनकारयित्री कैयटोक्तिः ना समीचिना यतः- 'इकोयणचि' सूत्रे यत्र तदन्तविधिपक्षे अपि गुणस्य यदा पञ्चसंज्ञानामपेक्षा तिष्ठति तदा यणः कृते केवलं संज्ञात्रयस्य अपेक्षा विद्यते। अत्र यण् अल्पापेक्षत्वात् अन्तरङ्गं भविष्यति, तथाहि "अन्तरंगत्वात् गुण एव स्यात् '' इति भाष्यवचनं व्यर्थं भविष्यति। तस्मात् उठ् प्रति गुणस्य संज्ञाकृत वहिरंगता नैव समुचिता।

पुनश्च नागेशः वलिलोपप्रसंगे कथयति-वलिलोपे अन्तरंगपरिभषायाः प्रवृत्तिरेव नास्ति। वलिलोपविधायकसूत्रे भाष्ये 'व्रश्चन' इति प्रयोगे वलिलोपमाशंक्य भाष्यकारेण एवं समाहितम् – वकारस्य उपदेशः धातौ कृतत्वात् तस्य वस्य लोपः ना भविष्यति। यदि वस्य लोपः स्यात् तर्हि तस्य उच्चारणं व्यर्थं स्यात्। अतः वलिलोपसंबन्धे एवं ज्ञातव्यम् – यदि एकत्रैव अन्तरङ्ग-वहिरंगपरिभाषयोः प्राप्तिः स्यात्, तर्हि तत्रैव वलिलोपसन्दर्भे अन्तरंगपरिभाषा प्राप्स्यति।

**वहिरंगशास्त्रस्य असिद्धता।**

नागेशभट्टः कथयति – अन्तरंगे कर्त्तव्ये जातं, तत्कालप्रप्तिकं च वहिरंगमसिद्धम् ।अत्र इदं तात्पर्यम् यत् – अन्तरंगशास्त्रस्य कर्त्तव्यतायां जात वहिरंगं तथा तत्कालप्राप्तं वहिरंगं नाम अन्तरंगसहितंप्राप्तं वहिरंगमसिद्धं भवतीति। अत्र जातवहिरंगस्य उदाहरणं- पचावेदम्। अत्र पाचव-इदम् इति स्थितौ गुणैकादेशकृते पूर्वान्तिवद्भावेन एकारे लोडुत्तमत्त्वस्य उपस्थितौ 'एत ऐ' सूत्रेण एकारस्य ऐकारं प्राप्नोति। तत्र एकरादेशः अन्तरङ्गः, एतदपेक्षया गुणकार्यं तु वहिरंगं भवति, तस्मात् अन्तरंग 'एत ऐ' कर्त्तव्यतायां जातवहिरंगं प्राप्नोति। अतः एकारस्य ऐकारः न भविष्यति। अत्र शंका जायते यत् –फ़लभेदत्वात् सम्प्रसारणद्वारा 'विश्वौहः; इतिप्रयोगस्य सिद्धिं समाश्रित्य उठ्ग्रहणस्य व्यर्थता तथा तेन संप्रस्तुतपरिभाषायाः ज्ञापनमिति द्वयस्य असंगतिः स्यात्। यतः प्रपुर्व वह धातोः

ण्विप्रत्यये उपधावृद्धौ प्रवाह-शस् इति स्थितौ संप्रसारणे, पूर्वरूपे, लघुपधगुणे च जाते प्र-ओह्-अस् इति स्थितौ 'वृद्धिरेचि' सूत्रप्राप्तां वृद्धिं प्रवाध्य 'एङि पररूपम्' सूत्रेण पररूपे कृते 'प्रोहः' पदं सिद्ध्यति ।तत्र पुनः कार्यकालपक्षे त्रिपादीसूत्रेषु इयं परिभाषा तु दुर्वारा इति प्राचीनमतानुसारं जातायां शंकायां नगेशः व्रुते- यत् यथोद्देशपक्षवत् कार्यकालपक्षे च त्रिपादी सूत्रेषु इयं परिभाषा नैव प्राप्नोति ।अत्र तत्त्वतः 'पूर्वत्रासिद्धम्' सूत्रेण इयं परिभाषा वाध्यते इति, तस्मात्

कार्यकालपक्षे च त्रिपादीसूत्रेषु इयं परिभाषा ना प्रवर्त्तते। तेन 'विसर्जनीयस्य सः' इतिसूत्रस्थभाष्यं सुसंगतं भविष्यति।

**सामान्यापेक्षत्वमन्तरंगत्वं विशेषापेक्षत्वं वहिरंगत्वम् -**

अन्तरंगवहिरंगयोः लक्षणविमर्षप्रसंगे उच्यते – सामान्यापेक्षत्वमन्तरंगत्वम्, विशेषापेक्षतत्वं वहिरंगत्वम्। इति चेत् स्वीक्रियते तर्हि तमदिक आदेशः विशेषापेक्षत्वात् वहिरंगं भविष्यति। एतादृशिस्थितौ तस्य अन्तरंगत्व प्रतिपादनमसंगतं स्यात्। तथा च 'अन्तर्भूतनिमित्तकत्वमन्तरंगत्वम्' एतादृशलक्षणस्वीकरे तत्र च न्यूनताप्रदर्शनाय'नन्वेव...'पंक्तीनामुद्धरणं क्रीयते। अत्रायमाशयः –स्रु धातोः णिच् प्रत्यये लुङ्लकारे अडागमे च्लिप्रत्यये, तत्र च चङ् आदेशे द्वित्वादिकृते – अ सू स्रु अ त् इतिस्थितौ लघुपधगुणस्तथा चङ्निमित्तिक उवङ् सहप्राप्ति अवस्थायामन्तरंगत्वात् उवङ् कृत्वा असुस्रुवत् इति सिद्धम्।

अत्र नगेशः वर्णयति- यत् अन्तरंगत्वं लोकान्यायसिद्धमिति, तथाहि- मनुष्योऽयं प्रातरुत्थाय शरीरकार्याणि करोति, ततः सुहृदां, ततः संबन्धिनाम् । तथैव शब्दशास्त्रे च शब्दश्रवणानन्तरं सर्वादौ जातेः वोधः, ततः जतिपुरस्कृतव्यक्तिवोधः, ततः जतिविशिष्टव्यक्तौ लिंग-संख्या-करकाणां संबन्धः परिलक्ष्यते।

नवीनवैयाकरणदीक्षितादीनां मतानुसारं परिभाषेयं कर्यकालपक्षे त्रिपाद्यां चेत् प्रवर्त्तेत तर्हि-मुम् असिद्धत्वात् उपर्योक्तदोषः तदवस्थ एव । अत्र उत्तरयितुं वर्ण्यते – नव्यमते यथोद्देशपक्षस्याश्रयणे त्रिपाद्यामस्याः परिभाषायाः प्रवृत्तिः न भविष्यति । अतश्चेत् त्रैपादिकान्तरंगे अस्याः परिभाषायाः प्रवृत्तिः न स्यात् तर्हि वहिरंगमुमादीनामसिद्धत्वं न भवेत्, अत्र नगेशभट्टस्य अभिप्रायस्तु परिभाषेयं 'वह ऊठ्' सूत्रस्थ ऊठ्द्वारा ज्ञापितत्वात् तद्देषीयः भवतीति।

## ग्रन्थसूची


१. अष्टाध्यायी, पाणिनी, चौखम्वा सूरभारती प्रकाशन, वारणासी।
२. वाक्यपद्वीयम्, भर्त्तृहरि, व्याख्याकारः वामदेव आचार्य, कृष्णदास एकाडेमी,वारणासी १९९७।
३. महाभाष्यम्, पतञ्जली, व्याख्याकार- चारुदेवशास्त्री, चौखम्वा संस्कृत सिरिज, वारणासी-१९७२।
४. परिभाषेन्दुशेखर, विश्वनाथमिश्र, चौखम्वासुरभारती, वारणासी,२००५।